National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 230-232
© 2026 NJHSR
www.sanskritarticle.com

**सोनू शर्मा**
शोधच्छात्रः,संस्कृतविभागः,
मोनाडविश्वविद्यालयः

**डा. विनिताशर्मा**
सहायकाचार्या,संस्कृतविभागः,
मोनाडविश्वविद्यालयः

**Correspondence:**
**सोनू शर्मा**
शोधच्छात्रः,संस्कृतविभागः,
मोनाडविश्वविद्यालयः

# सनाद्यन्तप्रत्ययसन्दर्भे पाणिनिजैनेन्द्रयोस्तुलनात्मकमध्ययनम्

**सोनू शर्मा**

### सनाद्यन्तप्रत्ययविधानम्

पाणिनिना स्वकृतावधिकारसूत्रत्रयं प्रदर्शितम्- **प्रत्ययः**[1], **परश्च**[2], **आद्युदात्तश्च**[3] जैनेन्द्रव्याकरणे सूत्रद्वयमधिकारत्वेन दृष्टिपथमायाति **त्यः**[4], **परः**[5]। जैनेन्द्रव्याकरणं वैदिकस्वराणां सत्तामनन्वानं सर्वत्रैवानुबन्धस्य प्रायेण हेयतां प्रदर्शति। एतदेवात्र कारणं यदमुना जैनेन्द्रण स्वव्याकरणे स्वरसम्बन्धि सूत्रं न प्रादर्शि। पाणिनिना आद्युदत्तत्वं प्रत्ययानां प्रदर्शितं वैदिकस्वरज्ञानाय परं जैनेन्द्रव्याकरणे तन्न दृष्टिपथमायाति।

पाणिनिनये प्रायेण प्रत्ययाः तृतीयाध्यायात् आरब्धाः परं जैनेन्द्रव्याकरणे प्रत्ययविधायकानि सूत्राणि द्वितीयाध्यायात् आरभ्यन्ते। **गुप्तिज्किद्भ्यः सन्**[6] इति सूत्रमिदम् उभाभ्यामपि व्याकरणाभ्यां समानरूपेण दृष्टिपथमनुसरति। सूत्रार्थोपि प्रायेण समान एव। अस्य सूत्रस्यार्थो भवति गुपू रक्षणे इत्येतस्मात् धातोः तिज् , कित् धातोः च सन्प्रत्ययो भवति। सूत्रस्यामुष्योदाहरणं समानरूपेण द्रष्टुं शक्यम्। उदाहरणानि यथा- जुगुप्सते। तितिक्षते। चिकित्सति।

### सूत्रस्य स्वरूपम्-

पाणिनिनये तृतीध्यायास्य षष्ठं सूत्रं भवति **"मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य"**[7] अदः सूत्रं जैनेन्द्रव्याकरणे **"मान्बधदान्शान्भ्यो दीश्चस्य"**[8] इति भवति। जैनेन्द्रेण अभ्यासस्य त्यागपुरस्सरं सूत्रमिदम् अग्रथीति ज्ञातुं शक्यते।

### प्रत्ययस्य स्वरूपम्-

वस्तुतः सन् इति प्रत्ययः समान एव। सन् इत्यत्र नकारः अनुबन्धार्थकः वर्तते नितः प्रयोजनं च **ञ्नित्यादिर्नित्यम्**[9] इति सूत्रेण आद्युदात्तत्वं भवति। वस्तुतः उभयत्रापि सन् इत्यस्य नितः प्रयोजनं समानमेव आद्युदात्तत्वम्।

### सूत्रस्य स्वरूपम्-

पाणिनिनये तृतीयाध्यायस्य प्रथमपादस्य सप्तमं सूत्रं भवति **"धातोः कर्मणः समानकर्तृकादिच्छायां वा"**[10] जैनेन्द्रव्याकरणे च द्वितीयाध्यायस्य प्रथमपादस्य षष्ठं सूत्रं भवति **"स्वेपः क्यच्"**।[11] अथास्यार्थो भवति स्वस्य यदिबन्तं तस्मादिच्छायां वा क्यज् भवति। वस्तुतः उभयत्रापि सूत्रद्वयेन क्यच्प्रत्ययस्य विधानं क्रियते। क्यच् इत्यत्र कचावितौ वर्तेते। ककारस्येत्संज्ञायाः फलं भवति **क्ङिति च**[12] इत्यनेन सूत्रेण गुणवृद्ध्योः निषेधः पाणिनिनये परं जैनेन्द्रव्याकरणे ककारः **नः क्ये** इत्येतस्मिन् सूत्रे सामान्यग्रहणार्थो भवति। पाणिनिनये आत्मनः शब्दस्य प्रयोगो विहितो वर्तते परं जैनेन्द्रव्याकरणे स्वशब्दस्य ग्रहणं कृतं वर्तते। उभयत्रापि उदाहरणानि समानरूपेण द्रष्टुं शक्यानि वर्तन्ते।

### सूत्रस्य स्वरूपम्-

पाणिनिनये तृतीयाध्यायस्य प्रथमस्य पादस्य नवमं सूत्रं वर्तते **काम्यच्च**[13] जैनेन्द्रव्याकरणे च द्वितीयाध्यायस्य प्रथमपादस्य सप्तमं सूत्रं भवति **काम्यः**[14]। उभयत्रापि सूत्रार्थः समान एव।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिनये प्रत्ययः काम्यच् वर्तते अथ चात्र जैनेन्द्रव्याकरणे प्रत्ययस्य स्वरूपं काम्यः इति वर्तते, चकारस्येत्संज्ञायाः फलं पाणिनीयव्याकरणे स्वरितविधानं वर्तते। उभयत्रापि रूपं समानमेव भवति 'पुत्रकाम्यति'।

**सूत्रस्य स्वरूपम्-**

पाणिनिनये तृतीयाध्यायस्य प्रथमस्य पादस्य दशमं सूत्रं भवति **उपमानादाचारे'**[15]**,** जैनेन्द्रव्याकरणस्य द्वितीयाध्यायस्य प्रथमपादस्य अष्टमं सूत्रं भवति **"गौणादाचारे"**[16] उभाभ्यामपि सूत्रभ्यां क्यच्प्रत्ययस्यैव विधानं भवति। उदाहरणं च भवति पुत्रीयति छात्रम्।

**सूत्रस्य स्वरूपम्-**

पाणिनिनये तृतीयाध्यायस्य प्रथमस्य पादस्य एकादशमं सूत्रं भवति **कर्तुः क्यङ् सलोपश्च"**[17]**,** जैनेन्द्रव्याकरणस्य द्वितीयाध्यायस्य प्रथम-पादस्य नवमं सूत्रं भवति **कर्तुः क्यङ् सखं विभाषा**[18]**।** उभाभ्यामपि सूत्रभ्यां क्यङ्प्रत्ययो भवति।

**प्रत्ययस्वरूपम्-**

क्यङ् इति प्रत्ययः कर्त्रर्थे भवति ङित्वादत्र आत्मनेपदत्वं भवति समानरूपेण उभाभ्यामपि व्याकरणभ्यामात्मनेपदत्वं स्वीकृत्य रूपं प्रदर्श्यते- श्येनायते।

**सूत्रस्य स्वरूपम्-**

पाणिनिनये तृतीयाध्यायस्य प्रथमस्य पादस्य द्वादशतमं सूत्रं भवति **'भृशादिभ्यो भुव्यच्येवर्लोपश्च हलः'**[19] अथ च जैनेन्द्रव्याकरणे सूत्रं द्वितीयाध्यायस्य प्रथमपादस्य दशमं भवति **भृशादेश्च्वौ हलो भुवि**[20] । उभाभ्यामपि सूत्रभ्यां क्य प्रत्ययस्य विधानं क्रियते। क्यप्रत्यये च रूपं समानमेव भवति।

**सूत्रस्य स्वरूपम्-**

पाणिनीयव्याकरणे तृतीयाध्यायस्य प्रथमपादस्य त्रयोदशतमं लक्षणं भवति **लोहितादिडाज्भ्यः क्यष्।**[21]अथ च जैनेन्द्रव्याकरणे द्वितीया-ध्यायस्य प्रथमपादस्य एकादशतमं सूत्रं भवति **डाज्लोहितात् क्यष्।**[22] उभाभ्यामपि सूत्रभ्यां समानरूपेण क्यष्प्रत्ययस्य विधानं क्रियते।

**प्रत्ययस्य स्वरूपम्-**

क्यष्प्रत्ययः लोहितादिगणपठितेभ्यः शब्देभ्यः डाच्प्रत्ययान्तेभ्यः च्व्यर्थ्येभ्यो भवति। ककारषकारावितौ भवतः। षकारस्येत्संज्ञायाः फलं **षिद्गौरादिश्च**[23] इत्यादिनां सूत्राणां प्रयोगस्थले वयं ज्ञातुं शक्नुमः।

**सूत्रस्य स्वरूपम्-**

पाणिनिनये तृतीयाध्यायस्य प्रथमस्य पादस्य नवदशतमं सूत्रं भवति **नमोवरिवश्चित्रङः क्यच्।**[24] जैनेन्द्रव्याकरणे द्वितीयाध्यायस्य प्रथमपादस्य षोडशतमं सूत्रं भवति **नमोवरिवश्चित्रङः क्यच्।**[25] उभयोरपि व्याकरणयोः समानरूपेण सूत्रमिदं दृष्टिपथमनुवर्तते।

**प्रत्ययस्य स्वरूपम्-**

उभाभ्यामपि व्याकरणाभ्यां समानरूपेण प्रत्ययोसौ प्रदर्शितः। क्यच् इत्यत्र कचावितौ भवतः। प्रत्ययोसौ नमश्शब्दात् वरिवश्शब्दात् चित्रशब्दाच्च भवति। उदाहरणाय - वरिवस्यति । नमस्यति । चित्रीयते।

**सूत्रस्य स्वरूपम्-**

पाणिनिनये तृतीयाध्यायस्य प्रथमस्य पादस्य विंशतितमं सूत्रं भवति **पुच्छभाण्डचीवराण्णिङ्।**[26] अथ च जैनेन्द्रव्याकरणे द्वितीया-ध्यास्य प्रथमपादस्य सप्तदशमं सूत्रं भवति **पुच्छभाण्डचीवरा-ण्णिङ्।**[27] उभयोरपि व्याकरणयोः सूत्रं समानमेव वर्तते।

**प्रत्ययस्य स्वरूपम्-**

णिप्रत्ययः पुच्छशब्दात्, भाण्डशब्दात्, चीवरशब्दात् च भवति। असौ प्रत्ययः करोत्यर्थे भवति। णिङ् इत्यत्र ङकार अनुबन्धार्थः वर्तते। ङिता च आत्मनेपदत्वं सामान्येन भवति अतः रूपाणि आत्मनेपदीनि भवन्ति । यथोदाहरणायोदाहरणानि - सम्भाण्डयते । उत्पुच्छयते। परिपुच्छयते।

**सूत्रस्य स्वरूपम्-**

पाणिनिनये तृतीयाध्यायस्य प्रथमस्य पादस्य एकविंशं सूत्रं भवति **मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्।**[28] जैनेन्द्रव्या-करणे द्वितीयाध्यायस्य प्रथमपादस्य अष्टदशतमं सूत्रं भवति **मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्।**[29] उभयोरपि व्याकरणयोः अदः सूत्रं समानरूपेण द्रष्टुं शक्यम्।

**प्रत्ययस्य स्वरूपम्-**

णिच्प्रत्ययः मुण्डादिभ्यः भवतीति सामान्येन वयं दृष्टपूर्वाः। अत्र णिच्प्रत्यये णचावितौ स्तः। णित्वादादिवृद्धिः चित्स्वरिताय कल्प्यते। जैनेन्द्रव्याकरणे पाणिनीये च रूपं समानमेव दृश्यते यथा- मुण्डयति, मिश्रयति, श्लक्ष्णयति, लवणयति।

**सूत्रस्य स्वरूपम्-**

पाणिनिनये तृतीयाध्यायस्य प्रथमपादस्य द्वाविंशं सूत्रं भवति **धातोरेकाचो हलादेः क्रियासमभिहारे यङ्।**[30]जैनेन्द्रव्याकरणे द्विती-याध्यायस्य प्रथमपादस्य नवदशतमं सूत्रं भवति **धोर्यङ् क्रियासमभिहारे।**[31] उभयोरपि व्याकरणयोः सूत्रस्य स्वरूपं पृथग्दृ-श्यते। सूत्रे धु-इति पदं धातोः प्रतिनिधित्वेन वर्तते इति ज्ञेयम्। क्रियासमभिहारस्तु उभयोः व्याकरणयोः समानरूपेण सूत्रे नेत्रप-थमवतरति।

**प्रत्ययस्य स्वरूपम्-**

यङ्प्रत्ययः सामान्येन क्रियायाः पौनः पुन्येन भवनमर्थं निर्दिशति। यङ्-प्रत्यये ङकारस्यानुबन्धत्वात् अस्य आत्मनेपदं सिद्धं वर्तते। उभयत्रापि व्याकरणे प्रत्ययः समानरूपेण दृष्टिपथमनुसरति। अतः उभयत्रापि समानं रूपं दृग्गोचरीभवति। यथोदाहरणाय- पापच्यते, बोभुज्यते, सोसूच्यते। एवमेव अयं प्रत्ययः गतिविशेषेपि उभयत्रापि

दृश्यते। सूत्रं यतो हि पृथग्वर्तते परं समानरूपेण रूपाणि उदाहरणत्वेन द्रष्टुं शक्यानि।

**सूत्रस्य स्वरूपम्-**

पाणिनिनये तृतीयाध्यायस्य प्रथमस्य पादस्य चतुर्विंशतितमं सूत्रं भवति **लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्।**[32] अथ च जैनेन्द्रव्याकरणस्य द्वितीयाध्यायस्य प्रथमपादस्य एकविंशतितमं **लुपसदचरजपजभदहगृदशो गर्हे**[33] सूत्रं भवति।

उभयोरपि व्याकरणयोः सूत्रस्य स्वरूपं पृथग्वर्तते। पाणिनिनये भावगर्हायाम् इति प्रयुक्तं वर्तते परं जैनेन्द्रव्याकरणे गर्हे इत्येव प्रयुक्तं वर्तते।

**प्रत्ययस्य स्वरूपम्-**

अत्रापि प्रत्ययःसमानो भवति परमत्र गर्हेऽर्थे गम्यमाने सत्येवासौ प्रत्ययः सम्भवति। पूर्वं यो विहितः प्रत्ययः सोसौ प्रत्ययः क्रियासमभिहारार्थं द्योतयति परमत्र विहितः प्रत्ययः गर्हार्थकः वर्तते। ङित्वादात्मनेपदम् इति सामान्यमेवामुष्मिन्नपि स्थाने। उदाहरणानि यथा- लोलुप्यते। सासद्यते। चम्पूर्यते।

**उपसंहारः**

एवम्प्रकारेण ज्ञातुं शक्यते जैनेन्द्रव्याकरणे पाणिनीये च व्याकरणे यतो हि सूत्राणां स्वरूपे पार्थक्यमक्षिलक्ष्यीक्रियते परं परमार्थतः उदारणेषु न किञ्चिदपि वैषम्यं भवति। पाणिनिस्तु श्रुतिमन्तरा न किञ्चिदपि कर्तुमात्मानं व्यापारयतीति दिशा स्वरनिर्देशार्थं प्रायेणानुबन्धानां सङ्ग्रहेप्सुर्दृश्यते। जैनेन्द्रेणानुबन्धा उपेक्षिता यतो हि तेषां प्रयोजनवत्त्वं नास्त्यमुष्य कृतौ, पाणिनिस्तु स्वरानुसन्धित्सुः वेदैकानुयायी अनुबन्धैःश्रुतिपरम्परायाः विवितनिषुरतोऽस्य कृताव-ष्टाध्याय्यामनुबन्धानुपनिबबन्धे।

**पाद टिप्पणी –**

1 अ. सू. ३.१.१
2 अ. सू. ३.१.२
3 अ. सू. ३.१.३
4 जै. सू. २.१.१
5 1 जै. सू. २.१.२
6 क)अ. सू. ३.१.३, ख) जै. सू. २.१.१
7 अ. सू. ३.१.६
8 जै. सू. २.१.४
9 अ. सू. ६.१.१९७
10 अ. सू. ३.१.७
11 जै. सू. २.१.६
12 अ. सू. १.१.५
13 अ. सू. ३.१.९
14 जै. सू. २.१.७
15 अ. सू. ३.१.१०
16 जै. सू. २.१.८
17 अ. सू. ३.१.११
18 जै. सू. २.१.९
19 अ. सू. ३.१.१२
20 जै. सू. २.१.१०
21 अ. सू. ३.१.१३
22 जै. सू. २.१.११
23 अ. सू. ४.१.४१
24 अ. सू. ३.१.१९
25 जै. सू. २.१.१६
26 अ. सू. ३.१.२०
27 जै. सू. २.१.१७
28 अ. सू. ३.१.२१
29 जै. सू. २.१.१८
30 अ. सू. ३.१.२२
31 जै. सू. २.१.१९
32 अ. सू. ३.१.२४
33 जै. सू. २.१.२१